बकोऽतिशिशिरस्तिक्तो मधुरो मधुगन्धकः ।
पित्तदाहकफश्वासभ्रमहारी च दीपनः ॥”
इति च राजनिर्घण्टः ॥
“शिवमल्ली पाशुपत एकाष्ठीला वुको वसुः ।
वुकोऽनुष्णः कटुस्तिक्तः कफपित्तविषापहः ।
योनिशूलव्रणारातिकुष्ठशोषासनाशनः ॥”
इत्यपि भावप्रकाशः ॥
तालव्यशकारः । यथा,—
“—————शो वान्तो वपरो बकः ॥”
इति बीजवर्णाभिधानम् ॥ * ॥
कुवेरः । रक्षोविशेषः । इति मेदिनी । के,३०॥ स च भीमेन हतः । (यथा महाभारते ।१।६५।७३।
“तस्यामप्येकचक्रायां बकं नाम राक्षसं हत्वा पाञ्चालनगरमभिगताः ॥”) अत्र कोषे पवर्गीय बकारादौ पठितोऽयं शब्दः किन्तु अमरटीकायां भरतेन अन्तःस्थवकारादिवचवकधातुभ्यां क्रमेण घप्रत्ययेन अनुप्रत्ययेन च साधितः ॥ * ॥ यन्त्रविशेषः । यथा,—
“जलकच्छपपातालदोलाभूधरबालुकाः ।
बकाद्या यन्त्रभेदाः स्युर्व्वान्याद्याश्च मूषिकाः ॥”
इति शब्दचन्द्रिका ॥
अस्य विवरणं यथा, वैद्यके ।
“दीर्घकण्ठकाचकूप्या गिलयेत् स्वल्पभाण्डकम् ।
तिर्य्यक् हत्वा पचेत् चुल्ल्यां बकयन्त्रमिति स्मृतम् ॥”
असुरविशेषः । स च श्रीकृष्णेन हतः । यथा,—
“स्वं स्वं वत्सकुलं सर्व्वे पाययिष्यन्त एकदा ।
गत्वा जलाशयाभ्यासं पाययित्वा पपुर्जलम् ॥
ते तत्र ददृशुर्बाला महासत्त्वमवस्थितम् ।
तत्र सुवज्रनिर्भिन्नं गिरेः कूटमिव च्युतम् ॥
स वै बको नाम महानसुरो बकरूपधृक् ।
आगत्य तरसा कृष्णं तीक्ष्णतुण्डोऽग्रसद्बली ॥
कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ।
बभूवुरिन्द्रियाणीव विना प्राणं विचेतसः ॥
तं तालुमूलं प्रदहन्तमग्निवद्
गोपालसूनुं पितरं जगद्गुरोः ।
चच्छर्द्द सद्योऽतिरुषाक्षतं बक-
स्तुण्डेन हन्तुं पुनरभ्यपद्यत ॥
तमापतन्तं स निगृह्य तुण्डयो-
र्दोर्भ्यां बकं कंससखं सतां पतिः ।
पश्यत्सु बालेषु ददार लीलया
मुदावहो वीरणवद्दिवौकसाम् ॥”
इति श्रीभागवते १० स्कन्धे ११ अध्यायः ॥

ब(व)कचिञ्चिका, स्त्री, मत्स्यविशेषः । तत्पर्य्यायः । बकाची २ । इति हारावली । १८८ ॥

ब(व)कजित्, पुं, (बकं जितवान् इति । जि + क्विप् ।) भीमसेनः । इति त्रिकाण्डशेषः ॥ श्रीकृष्णश्च ॥

ब(व)कधूपः, पुं, (बक इव शुभ्रवर्णो धूपः ।) दृकधूपः । इत्यमरटीका ॥

ब(व)कनिषूदनः, पुं, (निषूदयति हन्तीति । सूदि + ल्युः । बकस्य निषूदनो घातकः ।) भीमसेनः । इति हेमचन्द्रः । ३ । ३७२ ॥ श्रीकृष्णश्च ॥

ब(व)कपञ्चकं, क्ली, (बकोपलक्षिताः पञ्च तिथयो यत्र कप् । बकोऽपि तत्र नाश्नीयादिति वचनादेव तथात्वम् ।) कार्त्तिकशुक्लैकादश्यादिपञ्चतिथ्यात्मकम् । यथा,—
“तत्रैकादश्यादितिथिपञ्चके बकपञ्चकम् ।
बकोऽपि तत्र नाश्नीयान्मत्स्यञ्चैव कदाचन ॥
इति वचनात् ।” इति कृत्यतत्त्वम् ॥
“किञ्च । कार्त्तिकमधिकृत्य ब्रह्मपुराणम् ।
‘एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु ।
दिने दिने च स्नातव्यं शीतलासु नदीषु च ।
वर्ज्जितव्या तथा हिंसा मांसभक्षणमेव च ॥’
ततश्च मांसभक्षणनिषेधे कार्त्तिकमासतच्छुक्लपक्षतदेकादश्यादिपञ्चदिनानि शक्ताशक्तभेदात् पापतारतम्याद्वा निषिद्धानि ।” इति तिथ्यादितत्त्वम् । अपि च ।
“एकादशीं समारभ्य यावत् पञ्चदशी भवेत् ।
बकोऽपि तत्र नाश्नीयान्मीनं मांसञ्च किं नरः ॥”
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥

ब(व)कपुष्पः, पुं, (बक इव वक्रं पुष्पं यस्य ।) बकवृक्षः । इति शब्दरत्नावली ॥ (बकस्य पुष्पम् ।) अगस्तिकुसुमे, क्ली ॥

ब(व)कवृत्तिः, पुं, ( बकस्येव स्वार्थसाधिका वृत्तिर्यस्य । ) बकतुल्यवर्त्तनविशिष्टः । यथा,—
“पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥”
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥
तस्य लक्षणं यथा,—
“अर्व्वाग्दृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृतः ॥”
इति तट्टीकायां श्रीधरस्वामी ॥
अपि च ।
“अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठः शिल्पी विनीतश्च बकवृत्तिरुदाहृतः ॥”
इति पाद्मोत्तरखण्डे ११५ अध्यायः ॥

ब(व)कवैरी, [न्] पुं, ( बकस्य वैरी घातकत्वात् । ) भीमसेनः । इति जटाधरः ॥ श्रीकृष्णश्च ॥

ब(व)कव्रती, [न्] पुं, (बकव्रतमस्यास्तीति इनिः ।) मिथ्याविनीतः । बकवृत्तिः । इति जटाधरः ॥ तस्य लक्षणं यथा,—
“अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकव्रतधरो द्विजः ॥”
इति दानसागरे मनुः ॥

ब(व)काची, स्त्री, बकचिञ्चिकामत्स्यः । इति हारावली । १८८ ॥

ब(व)कारिः, पुं, (बकस्य अरिः ।) श्रीकृष्णः । यथा,
“तदा बकारिं सुरलोकवासिनः
समाकिरन्नन्दनमल्लिकादिभिः ।
समीडिरे चानकशङ्खसंस्तवै-
स्तद्वीक्ष्य गोपालसुता विसिस्मिरे ॥”
इति श्रीभागवते । १० । ११ । ५२ ॥
( भीमसेनश्च । बकराक्षसघातकत्वात् ॥ )

ब(व)कुलः, पुं, (ब(व)कते इति । ब(व)कि कौटिल्ये + “मद्गुरादयश्च ।” उणा० १ । ४२ । इति उरच् प्रत्ययरेफस्य लत्वं बाहुलकोपधोत्वञ्चलदत्तः ।) स्वनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । केसरः २ । इत्यमरः । २ । ४ । ६४ ॥ केशरः ३ । इति भरतः ॥ बकूलः ४ सिंहकेसरः ५ वरलब्धः ६ सीधुगन्धः ७ मुकूलः ८ सुकूलः ९ । इति शब्दरत्नावली ॥ स्त्रीमुखमधु १० दोहलः ११ मधुपुष्पः १२ सुरभिः १३ भ्रमरानन्दः १४ स्थिरकुसुमः १५ शारदिकः १६ करकः १७ सीसंज्ञः १८ विशारदः १९ गूढपुष्पकः २० धन्वी २१ मदनः २२ मद्यामोदः २३ चिरपुष्पः २४ ॥ ( यथा, महाभारते । १ । ६३ । ४२ ।
“पुन्नागैः कर्णिकारैश्च बकुलैर्दिव्यपाटलैः ॥”) अस्य गुणाः । शीतलत्वम् । हृद्यत्वम् । विषदोषनाशित्वम् । मधुरत्वम् । कषायत्वम् । मदाढ्यत्वम् । हर्षदायकत्वञ्च ॥ तत्कुसुमगुणाः । रुच्यत्वम् । चीराढ्यत्वम् । सुरभित्वम् । शीतलत्वम् । मधुरत्वम् । स्निग्धत्वम् । कषायत्वम् । मलसंग्रहकारकत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
“बकुलो मधुगन्धश्च सिंहकेसरकस्तथा ।
बकुलस्तु वरोऽनुष्णः कटुः पाके रसे गुरुः ॥
कफपित्तविषश्वित्रकृमिदन्तगदापहः ॥”
इति भावप्रकाशः ॥
तत्फलगुणाः ।
“बकुलं मधुरं ग्राहि दन्तस्थैर्य्यकरं परम् ॥”
तत्पुष्पगुणाः ।
“पद्मं कषायं मधुरं शीतं पित्तकफास्रजित् ।
तद्वत् बकुलपुन्नागकह्लारोत्पलपाटलम् ॥”
इति राजवल्लभः ॥
अस्योत्पत्तिर्यथा,—
“विचरन्तं तदा भूयो महेशं कुसुमायुधः ।
आरात् स्थित्वाग्रतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाध्मातदृशा हरः ।
स्मरमालोकयामास शिखाग्राच्चरणान्तिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् ! पादादारभ्य कक्षवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज्ज धनुः श्रेष्ठं तज्जगामाथ पञ्चधा ॥
यदासीन्मुष्टिबन्धस्थानं रुक्मपृष्ठं महाप्रभम् ।
स चम्पकतरुर्जातः सुगन्धाढ्यो गुणाकृतिः ॥
नाहस्थानं शुभाकारं यदासीद्वज्रभूषितम् ।
तज्जातं केशवारण्यं बकुलं नामतो नमैः ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजिविराजिता ॥
नाहोपरि तथा मुष्टौ स्थानं चन्द्रमणिप्रभम् ।
पञ्चगुल्माभवज्जाती शशाङ्ककिरणोज्ज्वला ॥
ऊर्द्ध्वं मुष्ट्या अधः कोट्योः स्थानं विद्रुमभूषितम् ।
तस्मात् बहुपुटा मल्ली संजाता विविधा मुने ! ॥”
इति श्रीवामनपुराणे ६ अध्यायः ॥